## सञ्ज्ञायामुपमानम् । (२०४/३६९२)

उपमानशब्दः सञ्ज्ञायामाद्युदात्तो भवति । [1]चञ्चा । [2]वध्रिका । खरकुटी । दासी । उपमानशब्दा एते उपमेयस्य सञ्ज्ञाः । तत्र 'इवे प्रतिकृतौ' (५. ३. ९६/२०५१) इति [3]यः कन्, तस्य[4] 'लुम्मनुष्ये' (५. ३. ९८/२०५३) इति लुप् । यद्येवं किमर्थमिदमुच्यते प्रत्ययलक्षणेन सिद्धमाद्युदात्तत्वम् ? एतदेव ज्ञापयति क्वचिदिह स्वरविधौ प्रत्ययलक्षणं न भवति इति । तथा च पूर्वत्रोदाहृतम् । सञ्ज्ञायाम् इति किम् ? अग्निर्माणवकः । उपमानम् इति किम् ? देवदत्तः ॥

## निष्ठा च द्व्यजनात् । (२०५/३६९३)

निष्ठान्तं द्व्यच् सञ्ज्ञायां विषये आद्युदात्तं भवति स चेदादिराकारो न भवति । दत्तः । गुप्तः । बुद्धः । प्रत्ययस्वरापवादः[5] । निष्ठा इति किम् ? देवः । भीमः । द्व्यच् इति किम् ? चिन्तितः । रक्षितः । अनात् इति किम ? त्रातः । आप्तः । सञ्ज्ञायाम् इति किम् ? कृतम् । हृतम् ॥

## शुष्कधृष्टौ । (२०६/३६९४)

आदिः उदात्तः इति वर्तते । शुष्क धृष्ट इत्येतावाद्युदात्तौ भवतः । शुष्कः । धृष्टः । असञ्ज्ञार्थ[6] आरम्भः ॥

## आशितः कर्ता । (२०७/३६९५)

आशितशब्दः कर्तृवाची आद्युदात्तो भवति । आशितो देवदत्तः । अशेरयमाङ्पूर्वादविवक्षिते कर्मणि कर्तरि क्तः । [7]तत्र थाऽथघञ् (६. २. १४४/३८७८) इति प्राप्तः स्वरो बाध्यते । [8]कर्तरि इति किम ? आशितमन्नम् । आशितं [9]देवदत्तेन । पूर्वत्र कर्मणि क्तः, उत्तरत्र भावे ॥

## रिक्ते विभाषा । (२०८/३६९६)

रिक्तशब्दे विभाषा [10]आदिरुदात्तो भवति । रिक्तः, रिक्तः । सञ्ज्ञायाम् (६. १. २०४/३६९२), 'निष्ठा च द्व्यजनात्' (६. १. २०५/३६९३) इत्यनेन पूर्वविप्रतिषेधेन नित्यमाद्युदात्तः ॥

## जुष्टार्पिते च च्छन्दसि । (२०९/३६९७)

जुष्ट अर्पित इति शब्दरूपे छन्दसि विषये विभाषा आद्युदात्ते भवतः । जुष्टः, जुष्टः । अर्पितः, अर्पितः । छन्दसि इति किम् ? भाषायां प्रत्ययस्वरेणान्तोदात्तावेतौ[11] ॥

---

1. चञ्चेव चञ्चा ह. 2. उदाहरणमिदं नास्ति ह. 3. यः नास्ति फ. ह. 4. प्रत्ययस्य इत्यधिकम् ह. 5. अयं इत्यधिकम् फ. 6. अयं इत्यधिकम् ह. 7. तत्र नास्ति फ. 8. कर्ता ब. क. ड. फ. ह, वाक्यमिदं नास्ति क. 9. अत्र इत्यधिकम् ह. 10. आद्युदात्तः फ. 11. एव इत्यधिकम् फ.